# श्रीरामरक्षा स्त्रोत

## || ॐ श्री गणेशाय नमः ||

अस्य श्रीरामरक्षास्तोत्रमंत्रस्य बुधकौशिक ऋषिः श्रीसीतारामचंद्रो देवता अनुष्टुप छंदः सीता शक्तिः श्रीमद हनुमान कीलकम श्रीरामचन्द्र प्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः ||

## || अथ ध्यानम ||

ध्यायेदाजानुबाहुं घृतशरधनुषं बद्धपद्मासनस्थम, पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्ननम, वामांकारुढ़ सीतामुखकमलमिल्ललोचनं नीरदाभम, नानालंकारदीप्तं दधतमुरुजटामंडनं रामचंद्रम ||

## || इति ध्यानम ||

चरितं रघुनाथस्य शतकोटि प्रविस्तरम् | एकैकमक्षरं पुंसां महापातकनाशनम् ||

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् | जानकीलक्ष्मणोपेतं जटामुकुटमण्डितं ||

सासितूणधनुर्बाणपाणिं नक्तंचरान्तकम् | स्वलीलया जगत्रातुं आविर्भूतम अजं विभुम् ||

रामरक्षां पठेतप्राज्ञः पापघ्नीं सर्वकामदाम् | शिरोमे राघवः पातु भालं दशरथात्मजः ||

कौसल्येयो दृशो पातु विश्वामित्रप्रियश्रुती | घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ||

जिह्वां विद्यानिधिः पातु कंठं भरतवन्दितः | स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ||
सीतापतिः पातु हृदयं जामदग्न्यजित | मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ||
सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः | उरु रघूत्तमः पातु रक्षःकुलविनाशकृता ||

जानुनी सेतुक्रित्पातु जंघे दशमुखान्तकः | पादौ विभीषणश्रीदः पातु रामोखिलं वपुः ||
एतां रामबलोपेतां रक्षां यः सुकृति पठेत | स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ||
पातालभूतलव्योमचारिणश्छद्मचारिणः | न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ||
रामेति रामभद्रेति रामचंद्रेति वा स्मरन | नरो न लिप्यते पापैः र्भुक्तिं मुक्तिं च विन्दति ||

जगतजैत्रैकमंत्रेण रामनाम्नाभिरक्षितम् | यः कण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ||
वज्रंपंजरनामेदं यो रामकवचं स्मरेत | अव्याहताज्ञः सर्वत्र लभते जयमंगलम् ||
आदिष्टवान् यथा स्वप्ने रामरक्षांमिमां हरः | तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः ||
आरामः कल्पवृक्षाणां विरामः सकलापदाम् | अभिरामस्त्रिलोकानां रामः श्रीमान स नः प्रभुः ||

तरुणौ रूपसंम्पन्नौ सुकुमारौ महाबलौ | पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ||
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ | पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ||
शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मताम् | रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ||
आत्तसज्जधनुषाविषुस्पृशा वक्षयाशुगनिषंगसंगिनौ | रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम ||

सन्नद्धः कवची खड्गी चापबाणधरो युवा | गच्छन्मनोरथोस्माकं रामः पातु सलक्ष्मणः ||
रामोदाश रथिः शूरो लक्ष्मणानुचरो बली | काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ||
वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः | जानकीवल्लभः श्रीमान अप्रमेय पराक्रमः ||
इत्येतानि जपननित्यं मद्भक्तः श्रद्धयान्वितः | अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशयः ||

रामं दुर्वादलश्यामं पद्माक्षं पीतवाससम | स्तुवन्ति नामभिर्दिव्यैः न ते संसारिणो नरः ||
रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं | काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम ||
राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शांतमूर्तिम | वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम ||
रामाय रामभद्राय रामचंद्राय वेधसे | रघुनाथाय नाथाय सीतायाः पतये

नमः ॥

श्रीराम राम रघुनन्दन राम राम । श्रीराम राम भरताग्रज राम राम ॥
श्रीराम राम रणकर्कश राम राम । श्रीराम राम शरणं भव राम राम ॥
श्रीरामचन्द्रचरणौ मनसा स्मरामि । श्रीरामचंद्रचरणौ वचसा गृणामि ॥
श्रीरामचन्द्रचरणौ शिरसा नमामि । श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥

माता रामो मत्पिता रामचंद्रः । स्वामी रामो मत्सखा रामचंद्रः ॥
सर्वस्वं मे रामचंद्रो दयालुः । नान्यं जाने नैव जाने न जाने ॥
दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा । पुरतो मारुतिर्यस्य तं वंदे रघुनंदनम ॥
लोकाभिरामं रणरंगधीरम राजीवनेत्रं रघुवंशनाथम । कारुण्यरूपं करुणाकरणतम श्रीराम चरणं शरणं प्रपद्ये ॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम । वातात्मजं वानरयूथमुख्यं श्रीराम दूतं शरणं प्रपद्ये ॥
कूजन्तं रामरामेति मधुरं मधुराक्षरम । आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम ॥
आपदां अपहर्तारं दातारं सर्वसम्पदाम् । लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥
भर्जनं भवबीजानाम अर्जनं सुखसम्पदाम् । तर्जनं यमदूतानां राम रामेति गर्जनम् ॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे । रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ॥

रामान्नास्ति परायणं परतरं रामस्य दासोस्म्यहं | रामे चित्तलयः सदा भवतु मे भो राम मामुद्धराः ||

राम रामेति रामेति रमे रामे मनोरमे | सहस्त्रनाम तत्तुल्यं रामनाम वरानने ||

**|| इति श्रीबुधकौशिकविरचितं श्रीरामरक्षास्तोत्रं सम्पूर्णं ||**

**|| श्रीसीतारामचंद्रार्पणमस्तु ||**

**www.hanumanchalisalyric.com**